## શ્રીમદનન્તાર્યકુમાર રામાનુજાર્યપુત્ર નારાયણાર્ચ પ્રણીતા
## ॥ શ્રીમદનન્તાર્ચ વિષયા અષ્ટશ્લોકી ॥

વન્દે–નન્તગુરૂત્તમ્સ વમ્શમુક્તાફલાત્મન: ।
રામાનુજાર્યસ્ય સુતમ શ્રીનારાયણદેશિકમ ॥

શ્રીરામાનુજવરજે મુનૌ શઠરિપોર્ગાથા વિશેષાર્થદે
શિષ્યાન પ્રેક્ષ્ય ભવત્સુ વેઙ્કટપતે:ક:કિઙ્કરસ્સ્યા દિતિ ।
પ્રશ્નમ કુર્વતિ તેષુ મૌનિષુચ યો બદ્ધાઞ્જલિ: પ્રાર્થયન
પ્રાપ શ્રીનિધિકિઙ્કરત્વમનઘમ તમ શેષ સૂરિમ ભજે ॥ 1

શ્રીરઙ્ગાદ્વૃષભાચલમ પ્રચલિતેશ્વાર્યેષુ ભોજ્યાર્થિષુ
શ્રાન્તેષ્વધ્વનિ વેઙ્કટાચલપતિ: ચિત્રાન્ન પાત્રમ વહન ।
પ્રુષ્ટસ્તૈરિતિ કો ભવાન કુત ઈદમ ચ:શિષ્યભાવમ વદન
પદ્યેયદ્વિષયે બભાણ ફણિરાટ સૂર્યુત્તમમ તમ ભજે ॥ 2

સ્નાતુમ સ્વામિ સરોવરમ પ્રતિ ચલન શેષાર્યવર્ય:પથિ
વ્યાઘ્રે ચેલ દશાઞ્ચલ સ્પ્રુશિ તત: શિષ્યેષુમુક્ત્યર્થિષુ ।
ભૂયાદેવમિતિબ્રુવન પુનરપિ સ્નાત્વૈત્ય પશ્યન મ્રુતમ
દીપ્તમ વેઙ્કટનાયકાઙ્ઘ્રિકમલે હ્રુષ્ટો–સ્તુન: શ્રેયસે ॥ 3

તિષ્ઠન શેષગુરો મમિવહિગુરૌ મુક્તિમ પરૌદુર્લભામ
વ્યાઘ્રાદેશ્ચ દદાતિ ચેદપિ ભવાન કિમ્મે–ત્ર યાસ્યામ્યહમ ।
ઈત્યુક્તશ્ચ વ્રુષાદ્રિ રાજપતિના–નન્તાર્ય ચૂડામણિ:
મત્ત: શ્રૈષ્ઠયમિદમ તવાત્ર ન પરમ સપ્તાહ ઈત્યબ્રવીત ॥ 4

યાસ્યન કેરલસમ્જ્ઞકમ જનપદમ પાથેય બન્ધમ પથિ
સ્નાત્વા––રાધ્ય જગદ્ગુરુમ તદનુ યો ભોક્તુમ વિવિચ્યાદરાત ।
ધ્રુષ્ટ્વા તત્રપિપીલિકા ઈતિ મયા નાન્યત્ર નેયા ઈમા:
શેષાદ્રિમ પુનરેત્ય તાશ્ચમુમુશે નન્તાસ્મ્યનન્તમ ગુરુમ ॥ 5

શ્રીમચ્ચમ્પક જાતિ કુન્દકુટજા ધ્યુત્ફુલ્લ પુષ્પાકરે
યસ્યોદ્યાનવરે પરસ્સ ભગવાન શ્રીવેઙ્કટેશો નિશિ ।
ત્યક્ત્વાનન્દવિમાનમન્વહમહો લક્ષ્મ્યાસહારમ્સ્ત હા
તસ્મૈ શેષગુરૂત્તમાય સતતમ કુર્યામ નમસ્સન્તતિમ ॥ 6

શ્રીમદ્વેઙ્કટનાયક પ્રિયતમા વાત્સલ્ય સીમા રમા
નિશ્યુદ્યાન લતાન્ત કેલિસમયે ગ્રસ્તાતિ ભીતેવ સા ।
સપ્રેમસ્મિતમાહ મુગ્ધમધુરમ ભોસ્તાત તાતેતિ યમ
તમ વન્દે ગુરુમૌલિ શેખરમહમ શેષાર્યવર્યમ સદા ॥ 7

કન્યાકક્ષકરાત્ત પુષ્પપિટકમ કાલ્યાગતમ શ્રીનિધિ:
મહ્યમ દેહિ તવાત્મજામિતિ ભૃશમ યમ પ્રાર્થ્યલેભે નત: ।
કન્યાશુલ્કમિતીવ સસ્પ્રુહતરમ પ્રોદ્ધ્રુત્ય કણ્ટાગ્નિજાત
માલામ યસ્ય ગલે–ર્પયન તમનિશમ શેષાર્યવર્યમ શ્રયે ॥ 8

શ્રીમદ્રામાનુજાચાર્ય પુત્ર નારાયણોદિતમ ।
કલયન્તુ સદા સન્તો–નન્તાર્યાષ્ટક માદરાત ॥

**॥ શ્રીમદનન્તાર્ય અષ્ટશ્લોકી સમ્પૂર્ણમ ॥**

---